श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीतं

# ॥ श्रीमन्निगमान्तमहादेशिक प्राबोधिकस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्निगमान्तमहादेशिक प्राबोधिकस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

निरालोके लोके विमतकथकध्वान्तनिवहैः
श्रियः पत्याऽज्ञप्तो धरणिमवतीर्यातिकृपया।
व्यतानीद्यो भाष्यद्युमणिमखिलाज्ञानहृदये
सजीयाच्छ्रीरामानुज मुनिवरात्मा फणितिः॥

भाष्यं यस्य निशम्य लक्ष्मणमुनेः कौतूहलाद्भारती
सूत्राणामिदमुत्तमं विवरणं निश्चित्य मानानुगं।
वागीशस्य निजप्रियाय निखिलान् वेदान् प्रदातुः शुभां
मूर्तिं स्वेन सदार्चितां समददाद्यस्मै स जीयामुनिः॥

नृप उपरिचराख्यो व्यासमातामहोभू-
विवर मुपगतोपि ह्यर्हणं सात्वतोक्तं।
व्यतनुत नियतं प्राग्जागृहि त्वं यतीन्द्र
त्वरितमभिगमाद्यैरर्चितं वागधीशं॥

शेषाद्रीश्वर पादपद्मयुगली कैङ्कर्यहेतोः पुरा
या घण्टा किल भक्तिनम्रमनसा पद्मासनेनार्पिता।
तत्तत्तन्त्र पिशाचधूननकृते सङ्कल्पतः श्रीपतेः
जातायै निगमान्तदेशिकमिषात् कस्यै चिदस्यै नमः॥ १ ॥

जिह्वासिंहासनाग्र स्फुटनटन तुरङ्गास्यमञ्जीरसिञ्जा
स्पर्धा निर्धार्यवाचानिचय चुळुकित प्रत्यनीकप्रचारः।
श्रीमान् रामानुजार्य प्रथिततममत श्रीललामार्कधामा
नित्यं श्रुत्यन्तविद्यागुरुरिह जगतां भद्रवत्तां विधत्ताम्॥ २ ॥

संसाराटोपतापक्षपण निपुणवाग्धोरणीसारणी श्रीः
    वाणी सम्पूज्यपादादिम तुरगमहामन्दुरानन्तराशिः।
सङ्ख्यातीत प्रबन्ध प्रशमित विमतातङ्क शङ्काकळङ्को
    मोदान् वेदान्तसूरिः दिशतु गुरुवरः सर्वतन्त्रस्वतन्त्रः॥ ३ ॥

पादारविन्द युगळीनतचेतनाघ-
    खेदापहारि करुणादि गुणाम्बुराशे।
मोदाय सर्वजगतां भवतान्नितान्तम्
    वेदान्तदेशिक मणे तव सुप्रभातम्॥ ४ ॥

वैदुष्याद्यवलेप लेप पदवीसञ्चारदूरो गुरुः
    नित्यं गन्धवहोऽस्म्यहं तु तदितो भीतेन भाव्यं मया।
इत्थं मन्दगतिः सदागतिरिह प्राभातिको वात्यसौ
    श्रीमन्निगम मौलिदेशिकमणे स्यात् सुप्रभातं तव॥ ५ ॥

तमोऽवश्यं नश्येत् प्रचुरमपि तत्तादृशगुरु
    प्रबोधे सञ्जाते न विषय इहास्तीति तमिमम्।
नृणामर्थं सम्यक् प्रकटय यदि व भ्रश्यतितमो
    विबुध्यस्व श्रीमान् निगममकुटी देशिकमणे॥ ६ ॥

नियं पूर्णकलः कदापि तमसा नैवाभिभूतो गुरुः
    युक्तास्य द्विजराजता मम पुनर्नैवोचितानीदृशः।
इत्यस्ताद्रि गृहागृहेषु नियतं लीनो ह्रिया चन्द्रमाः
    स्वामिन् श्रीकवितार्किकद्विपहरे स्यात्सुप्रभातं तव॥ ७ ॥

महाभे सत्वाढ्ये वितमसिगुरौ जाग्रति तमो-
    रुचीनामस्माकं कथमिह भवेत् सत्वमिति किम्।
ह्रिया म्लानिं भानि द्यवि दधति सर्वाण्यतितरां
    जहीहि त्वं निद्रां कविकथक कण्ठीरवगुरो॥ ८ ॥

एते द्विजा विपुल शाखमहाऽगमान्त
    निष्ठाः प्रबोधमधिगम्यरुतच्छलेन।

तत्वं परस्परमिव प्रतिबोधयन्ति
    श्रुत्यन्त देशिकमणे तव सुप्रभातम्॥ ९ ॥

अन्तर्हतौ लसति धामनिधौ प्रकाशम्
    अत्यन्तमेत्य जगतां जनयन् प्रबोधम्।
प्राचीप्रदेश इह भाति भवानिवैषः
    प्राचीनवाक् शिखर देशिक ! जागृहि त्वं॥ १० ॥

तेजस्वितां दधदुदारतमो विधूय
    निस्नेहभाव मुपगम्य दशावसाने।
शान्तोद्य हन्त हरिपाद समर्पितात्मा
    दीपः प्रसन्न इव जागृहि देशिकेन्द्र॥ ११ ॥

दळितारविन्द नयनस्सरोमुनिः
    दधदुज्वलालिकमलाक्षिमालिकाम्।
हरिदर्शनं समभिकाङ्क्षति स्फुटं
    प्रति जागृहि श्रुतिशिरो गुरूत्तम॥ १२ ॥

इदमभिगमोपादानेज्यामुखं परमार्हणं
    तुरगवदनं ज्योतिस्त्वत्तोऽधिगन्तुमपेक्षते।
तदिह समयः प्राप्तो योगोपसंहरणोचितो
    भवतु भवतः सुप्रातं श्रीत्रयीमकुटीगुरो॥ १३ ॥

इन्धेपयोगं कमलं प्रबुद्ध
    योगं प्रबुद्धो विनिवर्तय त्वम्।
प्राप्तोद्य देवाभिगमस्य कालः
    श्रुत्यञ्चलाचार्य शिखामणे ते॥ १४ ॥

गाढा विद्येव रात्रिर्विगळति विशदज्ञानवद्भानुतेजः
    प्रोन्मीलत्यब्जबन्धुः जलजनयनवरौ दृक् पथं याति मन्दम्।
आनन्दं याति सान्द्रं मुनिसमुदयवत्कोकलोकस्समन्तात्
    भूयो वेदान्त विद्या गुरुवर भवतो दीप्रभास्सुप्रभातम्॥ १५ ॥

एते शुद्धाः विमलवसनाः सत्पवित्रोर्ध्वपुण्ड्राः
    सन्ध्या जप्य प्रमतहृदयाः वैष्णवास्त्वन्नियोज्याः।
त्वत्कैङ्कर्यप्रवणमतयः त्वत्प्रबोध प्रतीक्षाः
    सुप्रातं ते निगममकुटी देशिकेदं दिनं स्तात्॥ १६ ॥

निद्रानुभूति शबलैरमलैः कटाक्षैः
    विद्रावितार्तिभिरुपाश्रित लोकरक्षैः।
भद्राणि सर्वजगतां भगवन् विधातुं
    निद्रां विमुञ्च निगमाञ्चल देशिकेन्द्र॥ १७ ॥

व्याकोच नेत्रनळिनं वदनह्रदं ते
    लावण्यपूरभरितं ललितं विगाढुम्।
काङ्क्षन्ति सर्वजनता नयनाळि मालाः
    कामं जहीहि कविवादिमृगेन्द्र निद्राम्॥ १८ ॥

भाष्यादिगूढतमतत्वबुभुत्सयाऽमि
    श्रीब्रह्मतन्त्रयतिवर्य मुखामहान्तः।
क्लृप्ताह्निका सनियमाः प्रतिपालयन्ति
    त्वामागमान्त गुरुवर्य जहीहि शय्याम्॥ १९ ॥

भवताप परिग्लपितां जनता
    मविता सविता विनुतांबुरुहाम्।
अवतात् कवितार्किकसिंहगुरुः
    कवितावनितालललिता वसथम्॥ २० ॥

अगणेय महासुगुणाम्बुनिधिं
    प्रगुणात्म गुणार्यगणाभिनुतम्।
सुगमान् निगमान् कलयन्तममुं
    निगमान्तगुरुं प्रणमाम्युषसि॥ २१ ॥

सुदान्तं दुर्दान्त क्षपण निपुणं तं नतततेः
    अनन्तं वेदान्तं स्फुटमुपदिशन्तं करुणयम्।

महान्तं श्रीमन्तं गुणनिधिमनन्तार्यतनयं
प्रशान्तं मत्स्वान्तं श्रयतु निगमान्तार्यमुषसि॥ २२ ॥

कलयामि सूरि वलयार्चितं कृपा
निलयं महः कुवलयामृतद्युतिम्।
भ्रममौग्ध्य दूरतरमौज्ज्वलीनिधिं
श्रममौढ्यहृन्निगममौळि देशिकम्॥ २३ ॥

उपाश्रिताद्युपादपं कृपावनम्रपावनं
सुपाणिपादपल्लवं व्यपास्त सर्वपातकम्।
विभावरीश भावित प्रभाननं शुभासनं
सुभावनं विभावये त्रयी शिखाद्वयी गुरुम्॥ २४ ॥

माधवाराधनं बोधनश्रीधनं
साधु यूधव्यथोद्भेद निर्भेदनम्।
वादियूधानतं वेदवादस्फुरन्
मोदमीडामहे वेदचूडागुरुम्॥ २५ ॥

एते श्लोकैर्वलीकैः प्रगुणगुणगणं त्वांस्तुवन्स्त्वत्सपर्यां
श्रीकृष्णब्रह्मतन्त्रादिमपद कलिजित्संयमी संयतात्मा।
वाञ्छेयत्तर्हि दीव्यत्तरणि घृणिगणप्रस्फुटाब्जच्छटान्तः
माध्वी साध्वीभिरेनं स्नपयघन कृपापाङ्ग धाराभिरारात्॥ २६ ॥

विजयतां गुरुपङ्क्तिशिखामणिः
विजयतां यतिराजमतध्वजः।
विजयतां कवितार्किककेसरी
विजयतां निगमान्तगुरूत्तमः॥ २७ ॥

॥ इति श्रीमन्निगमान्तमहादेशिक प्राबोधिकस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥